# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-5) | **प्रश्नपत्रम्**–६ (New & Old) | **गुणाः** – ७० |
| **विषयः** – धर्मशास्त्रम् | **कोड**- CC - **3-5-10** | **समयः** – १० तः १ |
| **दिनाङ्कः** – १०/१२/२०१८ | **सन्दर्भग्रन्थः**– याज्ञवल्क्यस्मृतिः (प्रायश्चित्ताध्यायः) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः ससन्दर्भ व्याख्या विधेया ।** **१०**

१. पतिर्भार्यां सम्प्रविश्य गर्भो भूत्वेह जायते ।
जायायस्तद्धि जायात्वं यदस्यां जायते पुत्रः ॥

२. विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् ।
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ॥

३. सदृशस्त्रीषु जातानां पुत्राणामविशेषतः ।
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो जैष्ठ्यमुच्यते ॥

**प्र-२ द्वयोरेकस्य निबन्धो लेख्यः ।** **१०**

१. स्त्रीस्वभावः ।

२. दायभागः ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वयोः ससन्दर्भ व्याख्या विधेया ।** **१०**

१. औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ ।
दशाऽपरे तु क्रमशो गोत्ररिक्थांऽशभागिनः ॥

२. निर्भयं तु भवेद् यस्य राष्ट्रं बाहुबलाऽश्रितम् ।
तस्य तद् वर्धते नित्यं सिच्यमान इव द्रुमः ॥

३. अष्टौ मासान् यथाऽदित्यस्तोयं हरति रश्मिभिः ।
तथा हरेत्करं राष्ट्रान् नित्यकर्मव्रतं हि तत् ॥

**प्र-४ द्वयोरेकस्य सविस्तरं विवेचनं कुरुत ।** **१०**

१. औरसादीनां द्वादशानां पुत्राणां लक्षणानि लिखत ।

२. धर्मकृतं व्यवहारं न निवर्तयेत् – इति विवेचयत ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भं व्याख्या विधेया ।** १०

१. विप्रस्य त्रिषु वर्षेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥

२. सुबीजं चैव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथाऽर्याज्जात आर्यायां सर्वं संस्कारमर्हति ॥

३. विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ॥

**प्र-६ द्वयोरेकस्य सविस्तरं विवेचनं कुरुत ।** १०

१. दशमाऽध्यायस्य वर्ण्यविषयाणां सारांशं लिखत ।
२. वर्णसङ्करनिन्दां ग्रन्थोक्तदिशा लिखत ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** १०

१. स्त्रियं स्थविरेऽवस्थायां के रक्षन्ति?
२. मनुस्मृतेः नवमाऽध्याये श्लोकाः कति?
३. लोके स्त्री निन्दां कदा प्राप्नोति?
४. क्षेत्रभूता का कथ्यते?
५. ब्रह्मणा किमर्थं स्त्रियः सृष्टाः?
६. मनुष्यः कदा पुत्रवान् भवति?
७. पित्र्यं धनम् अशेषतः कः गृह्णीयात्?
८. दक्षः धर्माय कति पुत्रिकाः दत्तवान्?
९. पुन्नाम्नो नरकात् पितरं कः त्रायते?
१०. द्वादश प्रकारान् पुत्रान् नृणाम् – इति कः आह?
११. द्विजातयः के कथ्यन्ते?
१२. पारशवः कः उच्यते?
१३. क्षत्रियाद् विप्रकन्यायाम् उत्पन्नः पुत्रः किं नाम्ना कथ्यते?
१४. चर्मकारः कुतः प्रसूयते?
१५. मनुस्मृतौ कति अध्यायाः सन्ति?

–००–